नित्यकर्म
पद्धति

श्रीः

नित्यकर्मपद्धतिः।

खेमराज श्रीकृष्णदास प्रकाशन,

बम्बई

श्रीगणेशाय नमः

अथ नित्यकर्मपद्धतिः

प्रभाते गात्रमार्जनानन्तरं स्मरणीयम् ।

ब्रह्मामुरारिस्त्रिपुरान्तकारीभानुः शशीभूमिसुतो बुधश्च ॥
गुरुश्चशुक्रःशनिराहुकेतवःकुर्व्वन्तु सर्वे मम सुप्रभातम् ॥१॥
प्रभाते यः स्मरेन्नित्यं दुर्गादुर्गाक्षरद्वयम् ॥
आपदस्तस्य नश्यन्ति तमःसूर्योदये यथा ॥२॥
अहल्याद्रौपदी सीता तारा मन्दोदरी तथा ॥
पञ्चकंवै स्मरेन्नित्यं महापातकनाशनम्। ।३॥
पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ॥
पुण्यश्लोको विदेहश्च पुण्यश्लोको जनार्दनः ॥४॥

स्नानात् पूर्वं पाठ्यम्

विष्णुपादाब्जसंभूते गंगे त्रिपथगामिनि ॥ धर्म्मद्रवीति विख्याते पापं मे हर जाह्नवि ॥१॥ पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः ॥

त्राहि मां पुण्डरीकाक्ष सर्वपापहरो भव ॥२॥

स्नानविधिः ॥ आचमनं कृत्वा॥ विष्णुः ॥३॥ अद्य अमुके मासे अमुके पक्षे अमुकतिथौ अमुकगोत्रोऽमुकदेवशर्मा वा अमुकदासः श्रीविष्णुप्रीतिकामोऽस्यां गंगायां स्नानमहं करिष्ये। ब्राह्मणश्चेत् विष्णु-रोंतत्सत् अद्येति ब्रूयात् ॥ ततो मुखनासिकाचक्षुःकर्णादि कराभ्या-माच्छाद्य स्नायात् ॥

स्नानानन्तरं पाठ्यस्तोत्रम्

गंगायै नः ॥ देवि सुरेश्वरि भगवति गंगे त्रिभुवनतारिणि तरलतरंगे ॥ शंकरमौलिनिवासिनि विमले मम मतिरास्तां तव पदकमले ॥१॥ भागीरथि सुखदायिनि मातस्तव जलमहिमा निगमे ख्यातः ॥ नाहं जाने तव महिमानं त्राहि कृपामयि मामज्ञानम् ॥२॥ हरिपददात्रि तरंगिणि गंगे हिमविधुमुक्ताधवलतरंगे ॥ दूरीकुरूममदुष्कृतिभारं कुरु कृपया भवसागरपारम् ॥३॥ तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम्॥ मातर्गङ्गे त्वयि यो भक्तःकिल तं द्रष्टुं न यमः शक्तः ॥४॥ पतितोद्धारिणि जाह्नवि गंगे खण्डितगिरिवरमंडितभंगे ॥

भीष्मजननि खलु मुनिवरकन्ये पतितनिवारिणि त्रिभुवनधन्ये ॥५॥ कल्पलतामिव फलदां लोके प्रणमति यस्त्वां न पतति शोके ॥ पारावारविहारिणि गंगे सुरवनिताकृततरलापांगे ॥६॥ तव कृपया चेत् स्तोत्रतःस्नातः पुनरपि जठरेसोऽपि न जातः ॥ नरकनिवारिणि जाह्नवि गंगे कलुषविनाशिनि महिमोत्तुंगे ॥७॥ पुण्यदर्शने पुण्यतरंगे जय जय जाह्नविकरुणापांगे ॥ इन्द्रमुकुटमणिराजितचरणे सुखदे शुभदे सेवकशरणे ॥८॥ रोगं शोकं तापं पापं हर मे भगवति कुमतिकलापम् । त्रिभुवनसारे वसुधाहारे त्वमसिगुरुर्ममखलु संसारे ॥९॥ लोकानन्दे परमानन्दे कुरु मयि करुणां कातरवन्द्ये ॥ तव तटनिकटे यस्य निवासः खलु वैकुण्ठे तस्य निवासः ॥१०॥ वरमिह नीरे कमठो मीनःकिंवा तीरे सरटः क्षीणः॥ अथवा नीचः श्वपचो दीनो दूरे नृपतिस्तव न कुलीनः ॥११॥ भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये॥ गंगास्तवमिदममलं नित्यं पठति नरो यः सजयति सत्यम् ॥१२॥ येषां हृदये गंगाभक्तिस्तेषां भवति सदा सुखभुक्तिः॥ मधुहरकान्तापज्झटिकाभिः परमानन्दकलितललिताभिः ॥१३॥ गंगास्तोत्रमिदंभवसारंवाञ्छितफलदंपरमंसुखदम्। शङ्करसेवकशङ्कररचितं पठति नरो यस्तस्य भवेच्छम् ॥१४॥ इति गङ्गास्तोत्रं सम्पूर्णम् ॥

अथ गंगाप्रणामः

सद्यः पातकसंहर्त्री सद्यो दुःखविनाशिनी ॥
सुखदा मोक्षदा गंगा गंगैव परमा गतिः ॥

अथ गंगामाहात्म्यम्

गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि ॥
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥१॥

अथ गंगाष्टकम्

यत्त्यक्तं जननीगणैर्यदपि न स्पृष्टं सुहृद्बान्धवैर्यस्मिन् पान्थदृगन्तसन्निपतिते तैःस्मर्यते श्रीहरिः ॥ स्वांगे न्यस्य तदीदृशं वपुरहो स्वीक्रीयते पौरुषं त्वं तावत्करुणापरायणपरा मातासि भागीरथी ॥१॥ अच्युत चरणतरंगिणि गंगे शशिमौलिमालतीमाले ॥ त्वयितनुवितरणसमयेदेया हरता नमे हरिता ॥२॥ शून्यीभूता शमननगरीनीरवारारवाद्यायातायातैः प्रतिदिनमहो भेद्यमानाविमानाः ॥ सिद्धैःसार्द्धं दिवि दिविषदः सार्घ्यपात्रैकहस्ता मातर्गंगे यदवधि तव प्रादुरासीत्प्रवाहः॥३॥ पयो हि गांगं त्यजतामिहागं पुनर्न चांगेयदि वापि चांगम्॥

करे रथांगं शयने भुजंगं याने विहंगं चरणेंबुऽगांगम् ।।४।। कत्यक्षीणि करोटयःकति कति द्वीपिद्विपानांत्वचःकाकोलाःकति पन्नगाःकति सुधाधाम्नश्च खण्डाःकति ।। किं त्वं चकति त्रिलोकजननि त्वद्वारि-पूरोदरे मज्जज्जन्तुकदम्बकं समुदयत्येकैकमादाय यत् ।।५।। कुतोवा-पीवीचिस्तव यदि गता लोचनपथं त्वमापीता पीताम्बरपुरनिवासं वितरसि।। त्वदुत्संगे गंगे यदि पतति कायस्तनुभृतां तदा मातः शातक्रतवपदलाभोऽप्यतिलघुः ।।६।। त्वदम्भो लोकानामखिलदु-रितान्येव दहति, प्रगन्त्रीनिम्नानामपिनयसि सर्वोपरि गतान् ।। स्वयं जाता विष्णोजनयसि मुरारातिनिवहानहो मातर्गंगे किमिह चरितं ते विजयते।।७।। सुरधुनि मुनिकन्ये तारयेःपुण्यवंतं सतरति निजपुण्यै-स्तत्र किन्ते महत्त्वम् ।। यदि च गतिविहीनःतारयेःपापिनं मां तदिह इव तन्महत्त्वंमहत्त्वम् ।।८।। इतिगंगाष्टकंसंपूर्णम्।

अथ श्रीविष्णोर्नामाष्टकम्

नमो नारायणाय। अच्युतं केशवं विष्णुं हरिं सत्यं जनार्दनम् ।। हंसं नारायणं चैवमेतन्नामाष्टकं शुभम् ।।१।। त्रिसन्ध्यं यः पठेन्नित्यं पापं तस्य न विद्यते ।। शत्रुसैन्यं क्षयं याति दुःस्वप्नःसुस्वप्नो भवेत्।।२।।

गंगायां मरणं चैव दृढा भक्तिश्च केशवे ।। ब्रह्मविद्याप्रबोधश्च तस्मान्नित्यं पठेन्नरः ।।३।। इति श्रीब्रह्मपुराणे श्रीविष्णोर्नामाष्टकस्तोत्रं सम्पूर्णम्।

अथ श्रीविष्णोःषोडशनामस्तोत्रम्

औषधे चिन्तयेद्विष्णुं भोजने च जनार्दनम्।। शयने पद्मनाभं च विवाहे च प्रजापतिम्।।१।। युद्धे चक्रधरं देवं प्रवासे च त्रिविक्रमम्।। नारायणं तनुत्यागे श्रीधरं प्रियसंगमे ।।२।। दुःस्वप्ने स्मर गोविंदं संकटे मधुसूदनम्।। कानने नरसिंहं च पावके जलशायिनम् ।।३।। जलमध्ये वराहं च पर्वते रघुनन्दनम् ।। गमने वामनं चैव सर्वकार्येषु माधवम्।।४।। षौडशैतानि नामानि प्रातरुत्थाय यः पठेत्।। सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ।।५।। इति श्रीविष्णोः षोडशनामस्तोत्रं सम्पूर्णम् ।।

अथ श्रीराधास्तोत्रम्

राधा रासेश्वरी रम्या परमा च परात्मिका।। रासोद्भवा कृष्णकान्ता कृष्णवक्षःस्थलस्थिता ।।१।। कृष्णप्राणाधिका देवी महाविष्णुप्रसूरपि।। सर्वदा विष्णुमाया च सत्यासत्या सनातनी ।।२।। ब्रह्मस्वरूपा

परमा निर्लिप्ता निर्गुणा परा ॥ वृन्दावने च विजया यमुनातटवा-सिनी ॥३॥ गोपांगनानां प्रथमा गोपिका गोपमातृका ॥ सानन्दा परमानन्दा नन्दनन्दनकामिनी ॥४॥ वृषभानुसुता कान्ता शान्त्यर्पण-तमस्यच ॥ कामा कलावती कन्या तीर्थपूता सनातनी ॥५॥ सप्तत्रिं-शच्च नामानि वेदोक्तानि शतानिच॥ सारभूतानि पुण्यानि सर्वनामसु नारद ॥६॥ नवीनां हेमगौरांगीं पूर्णानन्दवतीं सतीम्॥ वृषभानुसुतां देवीं वन्दे राधां जगत्प्रसूम् ॥७॥ इति राधास्तवः ॥

अथ जयदेवकृतदशावतारस्तोत्रम्

प्रलयपयोधिजले धृतवानसि वेदम् ॥ विहितवहित्रचरित्रमखेदम् ॥ केशवधृतमीनशरीर जय जगदीशहरे ॥१॥ क्षितिरिह विपुलतरे तव तिष्ठति पृष्ठेधरणिधरणकिणचक्रगरिष्ठे ॥ केशवधृतकच्छपरूप जय-जगदीशहरे ॥२॥ वसति दशनशिखरेधरणी तव लग्ना। शशिनिकलं-ककलेव निमग्ना ॥ केशवधृतसूकररूप जय जगदीशहरे ॥३॥ तव-करकमलवरे नखमभ्दुतश्रृंगम्। दलितहिरण्यकशिपुतनुभृंगम्॥ केशव धृतनरहरिरूप जय जगदीश हरे ॥४॥ छलयसि विक्रमणे बलिमभ्दु-तवामन। पदनखजनितनीरजनपावन॥ केशवधृतवामनरूप जय जग-

दीश हरे ।।५।। क्षत्रियरुधिरमये जगदपगतपापम्। स्नपयसि पयसि शमितभवतापम् ।। केशव धृतभृगुपतिरूप जय जगदीश हरे ।।६।। वितरसि दिक्षु रणेदिक्पतिकमनीयम् । दशमुखमौलिबलिं रमणीयम् ।। केशवधृतरामशरीर जय जगदीश हरे ।।७।। वहसि वपुषि विशंदे वसनं जलदाभम्। हलहतिभीतिमिलितयमुनाभम् ।। केशवधृतहलधररूप जय जगदीश हरे ।।८।। निंदसि यज्ञविधेरहह श्रुतिजातम्। सदयहृदयदर्शितपशुघातम्।। केशव धृतबुद्धशरीर जय जगदीश हरे ।।९।। म्लेच्छनिवहनिधने कलयसि करवालम्। धूमकेतुमिव कमपिकरालम् ।। केशव धृतकल्किशरीर जय जगदीश हरे ।।१०।। श्रीजयदेवकवेरिदमुदितमुदारं श्रृणु सुखदं शुभदं भवसारम् ।। केशवधृतदशविधरूप जय जगदीश हरे ।।११।। वेदानुद्धरते जगन्ति वहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयतेक्षत्रक्षयंकुर्वते ।। पौलस्त्यंजयते हलं कलयते कारूण्यमातन्वते म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ।।१२।। इति दशावतारस्तोत्रम् ।।

अथ जगन्नाथस्तोत्रम्

नमःश्रीकृष्णचैतन्यचन्द्राय ।। कदाचित्कालिन्दीतटविपिनसंगीत-

करवो, मुदाभीरीनारीवदनकमलास्वादमधुपः ।। रमाशम्भुब्रह्मामर-पतिगणेशार्च्चितपदो, जगन्नाथः स्वामी नयनपथगामी भवतु मे ।।१।। भुजे सव्ये वेणुं शिरसि शिखिपुच्छं कटितटे, दुकूलं नेत्रान्ते सहच-रकटाक्षं च विदधत् ।। सदाश्रीमद्वृन्दावनवसतिलीलापरिचयो, जगन्नाथः स्वामी नयनपथगामी भवतु मे ।।२।। महाम्भोधेस्तीरे कनकरुचिरे नीलशिखरे, वसन्प्रासादांते सहजबलभद्रेण बलिना ।। सुभद्रामध्यस्थः सकलसुरसेवावसरदो, जगन्नाथः स्वामी नयनपथ-गामी भवतु मे।।३।। कृपापारावारः सजलजलदश्रेणिरुचिरो, रमावा-णीरामः स्फुरदमलपद्मेक्षणमुखः ।। सुरेन्द्रैराराध्यः श्रुतिमुखगणोद्गी-तचरितो, जगन्नाथः स्वामी नयनपथगामी भवतु मे ।।४।। रथारूढो गच्छ न् पथि मिलितभूदेवद्व१टलैः, स्तुतिप्रादुर्भावं प्रतिपदमुपाकर्ण्य-सदयः।। दयासिन्धुर्बन्धुः सकलजगतां सिन्धुसुतया, जगन्नाथः स्वामी नयनपथगामी भवतु मे ।।५।। परब्रह्मापीडो विकचकमलाभेक्षणयुगो, निवासीनीलाद्रौ निहितचरणोऽनन्तशिरसि ।। रसानन्दीराधासरसवपुरानन्दनसुखो, जगन्नाथः स्वामी नयनपथगामी भवतु मे ।।६।। न याचे ऽहंराज्यं नच कनकमाणिक्यविभवं, नयाचे ऽहं रम्यांसकलजनकाम्यां वरवधूम् ।। सदा कालेकाले प्रमथपतिनोद्गीत-

चरितो, जगन्नाथः स्वामी नयनपथगामी भवतु मे ।।७।। हरत्वं संसारं द्रुततरमसारं सुरपते, हर त्वं पापानां विततिमपरां यादवपते।। अहो-दीनानाथनिहितमचलं निश्चितमिदं, जगन्नाथः स्वामी नयनपथगामी भवतु मे ।।८।। जगन्नाथाष्टकं पुण्यं यः पठेत्प्रयतः शुचिः।। सर्वपाप-विशुद्धात्मा विष्णुलोकं स गच्छति ।।९।। इति कृष्णचैतन्यचंद्रमुख-पद्मविनिर्गतं श्रीजगन्नाथाष्टकं समाप्तम् ।।

अथाचमनम्

नमः। अपवित्रःपवित्रो वा सर्वावस्थां गतोऽपिवा । यः स्मरेत् पुण्ड-रीकाक्षं स बाह्याभ्यन्तरः शुचिः ।। श्रीविष्णुः श्रीविष्णुः श्रीविष्णुः ।।

अथ शूद्रस्यतर्पणविधिः।

पूर्वाभिमुखः ।। नमो ब्रह्मा तृप्यतां नमो विष्णुस्तृप्यतां नमो रुद्रस्तृ-प्यतां नमः प्रजापतिस्तृप्यताम् ।।

नमः ।। देवायक्षास्तथानागागन्धर्वाप्सरसोसुराः।। क्रूराः सर्पाः सुपर्णाश्च तरवोजिह्मगाःखगाः।। विद्याधरा जलधरास्तथैवाकाशगामिनः।। निराहाराश्च ये जीवाः पापेधर्मे रताश्च ये ।। तेषामाप्यायनायैतद्दीयते सलिलं मया।। तत उत्तराभिमुख उत्तरीयं मालावत् कृत्वा ।।नमः।।

सनकश्चसनन्दश्चतृतीयश्चसनातनः।। कपिलश्चासुरिश्चैववोढुः पञ्चशिखस्तथा।। सर्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ।। इति विपरीतक्रमेणाञ्जलिद्वयं दद्यात् ।।

ततः पूर्वाभिमुखः प्रकृतोत्तरीयः

नमो मरीचिस्तृप्यतां नमोऽत्रिस्तृप्यतां नमोऽङ्गिरास्तृप्यतां नमःपुलहस्तृप्यतां नमः क्रतुस्तृप्यतां नमो भृगुस्तृप्यतां नमः प्रचेतास्तृप्यतां नमो वसिष्ठस्तृप्यतां नमो नारदस्तृप्यताम् ।।

ततो दक्षिणाभिमुखो विपरीतोत्तरीयः

नमः अग्निष्वाताः पितरस्तृप्यंतामेतत्सतिलगंगोदकं तृप्यध्वम्।। नमःसौम्याःपितरस्तृप्यन्तामेतत् सतिलगंगोदकंतृप्यध्वम् ।। नमोहविष्मन्तः पितरस्तृप्यन्तामेतत् सतिलगंगोदकं तृप्यध्वम् ।। नमः ऊष्मपाःपितरस्तृप्यन्तामेतत् सतिलगंगोदकं तृप्यध्वम् ।। नमःसुकालिनःपितरस्तृप्यन्तामेतत् सतिलगंगोदकं तृप्यध्वम् ।। नमो बर्हिषदःपितरस्तृप्यन्तामेतत् सतिलगंगोदकं तृप्यध्वम्।। नमः।। आज्यपाः पितरस्तृप्यंतामेतत् सतिलगंगोदकं तृप्यध्वम् ।। प्रत्येकमेकांजलिं दद्यात्। सामान्यजले सतिलोदकमिति वदेत् ।।

दक्षिणाभिमुखो यमतर्पणम्

नमः।। यमाय धर्म्मराजाय मृत्यवे चान्तकाय च।। वैवस्वताय कालाय सर्वभूतक्षयाय च।।१।। औदुम्बराय दध्नायनीलाय परमेष्ठिने। वृको-दराय चित्राय चित्रगुप्ताय वै नमः ।।२।।

ततो दक्षिणाभिमुखःपितृतर्पणम्

नमः ।। आगच्छन्तु मे पितर इमं गृह्णन्त्वबञ्जलिम् ।। विष्णुर्नमः अमुकगोत्रः पिता अमुकदासः तृप्यस्वैतत् सतिलगंगोदकं तुभ्यं नमः (सामान्यजले सतिलोदकमिति वदेत्) एवं पितामहप्रपितामहमा-तामहप्रमातामहवृद्धप्रमातामहेभ्यः प्रत्येकमंजलित्रयं दद्यात्।। अमु-कगोत्रा माता अमुकी दासी तृप्यस्वैतत् सतिलगंगोदकं तुभ्यं नमः ।। एवं पितामहीप्रपितामहीभ्यामेवंमातामहीप्रमातामहीवृद्धप्रमाताम-हीभ्यःअंजलित्रयंदद्यात्।। ततः पत्न्यै पितृव्यप्रभृतिभ्रातृवर्गादिभ्यः प्रत्येकम् एकांजलि दद्यात्।।

रामतर्पणम्

आब्रह्मभुवनाँल्लोका देवर्षिमुनिमानवाः ।। तृप्यन्तु पितरः सर्वे मातृ-

मातामहोदयः ॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥ मया दत्तेनतोयेन तृप्यंतां भुवनत्रयम्॥

लक्ष्मणतर्पणम्

आब्रह्मस्तम्बपर्यन्तं सतिलगंगोदकं जगत्तृप्यतु ॥

ततो भीष्मतर्पणम्

वैयाघ्रपदगोत्राय सांकृतिप्रवराय च ॥ अपुत्राय ददाम्येतत् सतिलं भीष्मवर्मणे॥ प्रणामः ॥

भीष्मः शान्तनवो वीरः सत्यवादी जितेंद्रियः ॥ आभिरभ्दिरवाप्नोतु पुत्रपौत्रोचितांक्रियाम् ॥

नमः॥ येऽबान्धवा बान्धवा वा येऽन्यजन्मनिबान्धवाः ॥ ते तृप्तिमखिलां यान्तु ये चास्मत्तोयकांक्षिणः॥ इत्यनेनैकांजलिं दद्यात्॥ ततो जलादुत्थाय द्विराचम्य वस्त्रनिष्पीडनोदकेनतर्पयेत्। यथा ॥नमः। ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः । ते तृप्यन्तु मया दत्ताद्वस्त्रनिष्पीडनोदकात् ॥

नमः ॥ पिता स्वर्गः पिता धर्म्मः पिता हि परमन्तपः ॥ पितरि

प्रीतिमापन्ने प्रीयन्ते सर्वदेवताः। पितृचरणेभ्यो नमः ॥
सूर्यार्घ्यम् ॥ नमो विवस्वते ब्रह्मन्भास्वतेविष्णुतेजसे ॥ जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने॥ इदमर्घ्यं नमः ॥ श्रीसूर्याय नमः॥

सूर्यप्रणामः

नमः॥ जपाकुसुमसङ्काशंकाश्यपेयं महाद्युतिम् ॥
ध्वान्तारिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥

सूर्यस्तोत्रम्

वसिष्ठ उवाच॥ स्तुवन्नासत्तितः साम्बः कृशोधमनिसन्ततः ॥ राजन्नामसहस्त्रेण सहस्त्रांशुं दिवाकरम् ॥ खिद्यमानं तु तंदृष्ट्वा सूर्यःकृष्णात्मजंतदा॥ स्वप्ने तु दर्शनं दत्त्वा पुनर्वचनमब्रवीत् ॥ श्रीसूर्य उवाच॥ साम्ब साम्ब महाबाहो श्रृणु जाम्बवतीसुत ॥ अलं नामसहस्त्रेण पठस्वेमं स्तवं शुभम् ॥ यानि नामानि गुह्यानि पवित्राणि शुभानि च॥ तानि ते कीर्तयिष्यामि श्रृत्वा तच्चावधारय ॥ विकर्त्तनो विवस्वाश्च मार्त्तण्डो भास्करो रविः ॥ लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः ॥ लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा॥ तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः॥ गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः॥ एकविंश-

तिरित्येष स्तव इष्टः सदा मम।। लक्ष्म्यारोग्यकरश्चैव धनवृद्धियशस्करः।। स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः।। य एतेन महाभाग द्वे सन्ध्येऽस्तमनोदयं।। स्तौति मां प्रणतो भूत्वा सर्वपापैःप्रमुच्यते।। कायिकं वाचिकं चैव मानसं चैव दुष्कृतम्।। एकजप्येन तत्सर्वं प्रणश्यति ममाग्रतः।। एष जप्यश्च होमश्च सन्ध्योपासनमेव च।।बलिमन्त्रोऽर्घ्यमन्त्रश्च धूपमन्त्रस्तथैवच।। अन्नदाने तथा स्नाने प्रणिपाते प्रदक्षिणे।। पूजितोऽयं महामन्त्रः सर्वपापहरः शुभः।। एवमुक्त्वा तु भगवान् भास्करो जगदीश्वरः।। आमन्त्र्य कृष्णतनयं तत्रैवान्तरधीयत।। साम्बोऽपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम्।। पूतात्मा नीरुजःश्रीमान् बलैश्वर्ययुतोऽभवत्।। इतिश्रीसाम्बपुराणे रोगापनयनेश्रीसूर्यवक्त्रविनिर्गतःस्तवराजः समाप्तः।।

अथ सूर्यस्य द्वादशनामस्तोत्रम्

आदित्यःप्रथमं नाम द्वितीयन्तु विभाकरः।। तृतीयं भास्करःप्रोक्तं चतुर्थं च प्रभाकरः।। पंचमंच सहस्रांशुःषष्ठं चैव त्रिलोचनः।। सप्तमं हरिदश्वश्च अष्टमं च विभावसुः।। नवमं दिनकृत प्रोक्तं दशमं द्वादशात्मकः।। एकादशं त्रयीमूर्तिर्द्वादशं सूर्य एव च ।। द्वादशैतानि

नामानि प्रात:काले पठेन्नर:।।दु:स्वप्रनाशनंसद्य:सर्वसिद्धि:प्रजायते।। आयुरारोग्यमैश्वर्यं पुत्रपौत्रप्रवर्धनम्।। ऐहिकामुष्मिकादीनि लभंते नात्र संशय:।। इतिसूर्यद्वादशनामस्तोत्रं संपूर्णम्।।

अथ तुलस्यवचयनमन्त्र:

तुलस्यमृतनामासि सदा त्वं केशवप्रिया।
केशवार्थे चिनोमि त्वां वरदाभव शोभने।।

अथ तुलसीस्नानमन्त्र:

गोविन्दवल्लभां देवी भक्तचैतन्यकारिणीम्।।
स्नापयामि जगद्धात्रीं विष्णुभक्तिप्रदायिनीम्।।

तुलसीस्तोत्रम्

तुलसी सर्वभूतानां महापातकनाशिनी।। अपवर्गप्रदे देवि वैष्णवानां प्रिया सदा।। सत्ये सत्यवती चैव त्रेतायां मानवी तथा।। द्वापरे अवतीर्णासि वृन्दा त्वं तुलसी कलौ।।

तुलसीप्रणाम:

वृन्दायै तुलसीदेव्यै प्रियायै केशवस्य च ।।

विष्णुभक्तिप्रदे देवि सत्यवत्यै नमोनमः॥

गणेशस्य ध्यानम्

खर्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं, प्रस्यन्दन्मधुगन्धलुब्ध-मधुपव्यालोलगण्डस्थलम्। दन्ताघातविदारितारिरुधिरैः सिन्दूरशो-भाकरं, वन्दे शैलसुतासुतं गणपतिं सिध्दिप्रदं कामदम्॥ इति ध्यात्वा मानसोपचारैः संपूज्य पाद्यादिभिः पूजयेत् इति संपूज्य॥

गणेशस्य प्रार्थना

देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः॥
विघ्न हरन्तु हेरम्बचरणाम्बुजरेणवः॥

अथ शिवपुजाविधिः

विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया॥
विना मालूरपत्रेण नार्च्चयेत् पार्थिवं शिवम् ॥१॥
मूर्त्तयोऽष्ट शिवस्यैताः पूर्वादिक्रमयोगतः॥
ऐशायन्ताःप्रपूज्यंते वेद्यां लिंगे शिवं भजेत् ॥२॥

पञ्चदेवतापूजा

शिवं भास्करमग्निं च केशवं कौशिकीं तथा।। एतान् प्रपूजयेदादौ सर्वसिद्धिफलप्रदान्।। मृदाहरणं घट्टनं प्रतिष्ठा ध्यानमेवच।। स्तवनं पूजनञ्चैव विसर्ज्जनमतःपरम्। हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् ।। शिवः पशुपतिश्चैव महादेव इति क्रमात्।।

शिवपूजाप्रकारः

हराय नम इति मृदाहरणम्।। महेश्वराय नमः इतिशर्कराकेशतुषादिरहितसंघट्टनम्। पशुपतये नमइति स्नापयेत्।। वज्राय फट् इति वज्रं मोचयेत्।।

जलशुद्धिः

गंगे च यमुने चैव गोदावरि सरस्वति।।
नर्म्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु।। पशुपतये नम इति स्नापयेत्।।

प्राणप्रतिष्ठा

नमः शूलपाणे पिनाकधृक् इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इह

सन्निहितो भव सुप्रतिष्ठितो भव मत्कृतां पूजां गृहाण अत्राधिष्ठानं कुरु।।

आसनशुद्धिः

आसनमन्त्रस्य मेरुपृष्ठऋषिः सुतलंछंदःकूर्मोदेवता आसनोपवेशने विनियोगः ।। पृथ्वि त्वया धृता लोका देवित्वं विष्णुनाधृता।। त्वञ्च धारय मां नित्यं पवित्रं कुरु चासनम्।। वामे गुरुभ्यो नमः। दक्षिणे गणेशाय नमः ऊर्ध्वं ब्रह्मणे नमः अधःअनन्ताय नमः। सम्मुखे शिवाय नमः।।

शिवस्य ध्यानम्

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारूचन्द्रावतंसं, रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ।। पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं, विश्वाद्यंविश्ववंद्यं निखिलभयहरंपंचवक्त्रं त्रिनेत्रम्। इतिध्यात्वा।। मानसोपचारैः संपूज्य पाद्यादिभिः पूजयेत्।। एतत् पाद्यं नमःशिवाय।। इदमर्घ्यं नमःशिवाय। इदमाचमनीय नमःशिवाय। एष गन्धः नमः शिवाय। एतत् पुष्पं नमः शिवाय। एतत्

बिल्वपत्रं नमःशिवाय। एषधूपःनमः शिवाय एष दीपः नमः शिवाय। एतन्नैवद्यं ।। नमःशिवाय।। इदमाचमनीयं नमःशिवाय ।। ऐशान्यादि-क्रमेणाष्टमूर्त्तीः पूजयेत्। शर्वायक्षितिमूर्त्तये नमः ।। भवाय जलमूर्त्तये नमः।। रुद्रायअग्निमूर्तये नमः।। उग्राय वायुमूर्तये नमः।। भीमाय आकाशमूर्तये नमः।। पशुपतये यजमानमूर्तये नमः।। महादेवाय सोम-मूर्तये नमः।। ईशानायसूर्यमूर्तये नमः।। मध्ये नमः शिवाय।। नमः शिवायइति अष्टवारं जप्त्वा स्तवपाठः कर्वव्यः।। गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।। सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर।।

शिवाष्टकम्

प्रभुमीशमनीशमशेषगुणं गुणहीनमहीशगराभरणम्।। रणनिर्जितदु-र्जयदैत्यपुरं प्रणमामि शिवंशिवकल्पतरुम्।।१।। गिरिराजसुतान्वित-वामतनुं तनुनिन्दितराजितकोटिविधुम्। विधिविष्णुशिरः स्तुतपाद-युगं प्रणमामि शिवं शिवकल्पतरुम्।।२।। शशलाञ्छनरञ्जितसन्मुकुटं कटिलंबितसुन्दरकृत्तिपटम्।। सुरशैवलिनीजललार्द्रजटं प्रणमामि शिवंशिवकल्पतरुम्।।३।। नयनत्रयभूषितचारूमुखं मुखपद्मविराजि-तकोटिविधुम्।। विधुखंडविमंडितभालतटं प्रणमामि शिवं शिवक-

ल्पतरु म्।।४।। वृषराजनिकेतनमादिगुरुं गरलाशनमाजिपिनाकधरम्।। प्रमथाधिपसेवकरञ्जनकं प्रणमामि शिवं शिवकल्पतरुम्।।५।। मकरध्वजमत्तकरींद्रहरं करितुंडगणेशविबोधकरम्।। वरदाभयशूलविषाणधरं प्रणमामि शिवं शिवकल्पतरुम्।।६।। जगदुद्भवपालननाशकरं मनसैव पुनर्गुणरूपधरम्।। प्रियमानवसाधुजनैकगतिं प्रणमामि शिवं शिवकल्पतरुम्।।७।। गिरिजासुहृदब्जविकासकरं शरणागतदीनसुभद्रपरम्।। भजतोऽखिलदुःखसमूहहरं प्रणमामि शिवं शिवकल्पतरु म्।।८।। न जानामि तेऽहं स्तुतिध्यानपूजा न मंत्रं न धर्मं सदा पापचित्तः।। तथाप्याशु तत्त्वं क्षमित्वा दयालो पुनर्जन्मदुःखात्परित्राहि शंभो।।९।। इति शिवाष्टकं समाप्तम्।। शिवाष्टके प्रणमामि शिवमिति द्विःपठेत्।।

महादेवस्य प्रणामः

नमस्तुभ्यं विरूपाक्ष नमस्ते दिव्यचक्षुषे।। नमःपिनाकहस्ताय वज्रहस्ताय वै नमः।। नमस्त्रिशूलहस्ताय दण्डपाशासिपाणये।। नमस्त्रैलोक्यनाथाय दूतानां पतये नमः।। बाणेश्वराय नरकार्णवतारणाय ज्ञानप्रदाय करूणामयसागराय।। कर्पूरकुन्दधवलेन्दुजटाधराय दारिद्र-

दु:खदहनाय नम:शिवाय।। नम: शिवाय शान्ताय कारणत्रयहेतवे।। निवेदयामि चात्मानं त्वं गति:परमेश्वर।।

नारायणस्य स्नानमन्त्रः

नम:।। सहस्रशीर्षा पुरूष: सहस्राक्ष:सहस्त्रपात्।। सभूमिं सर्वत:स्पृष्टा-ऽअत्यतिष्ठद्दशांगुलम्।। इति नारायणस्य स्नानमन्त्र:।।

नारायणस्य ध्यानम्

नम:।। ध्येय: सदासवितृमण्डलमध्यवर्ती नारायण:सरसिजासनस-न्निविष्ट:।। केयूरवान्कनककुण्डलवान् किरीटी हारी हिरण्यवपुर्धृत-शंख चक्र:। इति ध्यात्वा पूजयेत्।।

नारायणस्य प्रणाम:

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।। जगद्धिताय कृष्णाय गोवि-न्दाय नमो नम:।।

अथ नारायणप्रार्थना

पापोऽहं पापकर्म्माहं पापात्मा पापसंभव:।। त्राहि मां पुण्डरीकाक्ष सर्वपापहरो भव।।

अथ विष्णुस्तोत्रम्

गौतम उवाच।। जयकृष्ण जगन्नाथ जयवैकुण्ठनामधृक्।। जयदेव कृपासिन्धो जय लक्ष्मीपते प्रभो।।१।। जय नीलाम्बुजश्यामनीलजी-मूतसन्निभ।। जय पद्माधरित्रीभ्यां निषेवितपदाम्बुज।।२।। जनार्दन जगद्बन्धो शरणागतपालक।। त्वद्दासदासदासानां दासत्वं देहि मे प्रभो।।३।। इति श्रीगौतमशतानन्दसंवादे विष्णुस्तोत्रं समाप्तम्।।

नवग्रहस्तोत्रम्

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्।। ध्वांतारिं सर्वपापघ्न प्रण-तोऽस्मि दिवाकरम्।।१।। दधिशंखतुषाराभं क्षीरोदार्णवसम्भवम्।। नमामि शशिनं भक्तया शम्भोर्मुकुटभूषणम्।।२।। धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम्।। कुमारं शक्तिहस्तं च लोहितांगं नमाम्यहम्।।३।। प्रियंगुकलिकाश्यामंरूपेणाप्रतिमं बुधम्।। सौम्यं सर्वगुणोपेतं नमामि शशिनःसुतम्।।४।। देवतानामृषीणां च गुरुं कनकसन्निभम्।। वन्द्यभूतं त्रिलोकेशं तं नमामि बृहस्पतिम्।।५।। हिमकुन्दमृ णालाभं दैत्यानां परमं गुरुम्।। सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्।।६।। नीलांजन-चयप्रख्यं रविसूनुं महाग्रहम्। छायायागर्भसम्भूतं वन्दे भक्त्या शनै-

श्वरम्।।७।। अर्द्धकायं महाघोरं चन्द्रादित्यविमर्दकम्।। सिंहिकायाः सुतं रौद्रं तं राहुं प्रणमाम्यहम्।।८।। पलाशपुष्पसंकाशं तारग्रहविमर्दकम्।। रौद्रं रूद्रात्मजं क्रूरं तं केतुं प्रणमाम्यहम्।।९।। व्यासेनोक्तमिदं स्तोत्रं यः पठेत् प्रयतो नरः।। दिवा वा यदि वा रात्रौ शांतिस्तस्य न संशयः।।१०।। ऐश्वर्यमतुलं चापि ह्यारोग्यं पुष्टिवर्द्धनम्। नरनारीप्रियत्वं च तथा दुःस्वप्ननाशनम्।।११।। तक्षकोऽग्निर्यमो वायुर्ये चान्ये पीडक ग्रहाः। ते सर्वे प्रशमं यान्ति व्यासोब्रूते न संशयः ।।१२।। इति श्रीनवग्रहस्तोत्रं सम्पूर्णम्।।

अथ दुर्गाष्टकम्

नमस्ते शरण्ये शिवे सानुकंपे नमस्ते जगद्व्यापिके विश्वरूपे।। नमस्ते जगद्वन्द्यपादारविन्दे नमस्ते जगत्तारिणि त्राहि दुर्गे।।१।। नमस्ते जगच्चिन्त्त्य मानस्वरूपे नमस्ते महायोगिनि ज्ञानरूपे।। नमस्ते सदानन्द कन्दस्वरूपे नमस्ते जगत्तारिणि त्राहि दुर्गे।।२।। अनाथस्य दीनस्य तृष्णातुरस्य भयार्त्तस्य भीतस्य बध्दस्य जन्तोः।। त्वमेकागतिर्देवि निस्तारदात्रि नमस्ते जगत्तारिणि त्राहि दुर्गे।।३।। अरण्ये रणे दारुणे शत्रुमध्येऽनले सागरे कान्तरे राजगेहे।। त्वमेकागतिर्देवि निस्तारहे-

तुर्नमस्ते जगत्तारिणि त्राहि दुर्गे॥४॥ अपारे महादुस्तरेऽत्यन्तघोरे विपत्सागरे मज्जतां देहभाजाम्॥ त्वमेकागतिर्देवि निस्तारनौका नमस्ते जगत्तारिणित्राहि दुर्गे ॥५॥ नमश्चंडिके चण्डदोर्दण्डलीलालसत्खण्डिताखंडलाशेषभीते॥ त्वमेकागतिर्विघ्नसन्दोहहन्त्री नमस्ते जगत्तारिणि त्राहि दुर्गे॥६॥ त्वमेकाजिताराधिता सत्यवादिन्यमेयाजिताक्रोधनाक्रोघनिष्ठा॥ इडा पिंगला त्वं सुषुम्ना च नाडी नमस्ते जगत्तारिणि त्राहि दुर्गे॥७॥ नमोदेविदुर्गे शिवे भीमनादेसरस्वत्यरुन्धत्यमोघस्वरूपे॥ विभूतिःशची कालरात्रिः सती त्वं नमस्ते जगत्तारिणि त्राहि दुर्गे॥८॥ शरणमपि सुराणां सिद्धविद्याधराणां मुनिदनुजनराणां व्याधिभिःपीडितानाम्। नृपतिगृहगतानांदस्युभिस्त्रासितानां ए१वमसि शरणमेका देवि दुर्गे प्रसीद॥९॥ इदं स्तोत्रं मयाप्रोक्तमापदुद्धारहेतुकम्॥ त्रिसन्ध्यमेकसन्ध्यंवा पठनादेव संकटात्॥ मुच्यतेनात्रसन्देहो भुवि स्वर्गेरसातले॥१०॥ समस्तं श्लोकमेकं वा यः पठेद्भक्तितः सदा॥ स सर्वदुष्कृतं तीर्त्वा प्राप्नोतिपरमांगतिम्॥११॥ पठनादस्य देवेशि किं न सिद्धयतिभूतले॥ स्तवराजमिदं देवि संक्षेपात्कथितं त्वयि॥१२॥ इति विश्वसारे आपदुद्धारकल्पे दुर्गास्तवराजः समाप्तः॥

अथाद्यास्तोत्रम्

ॐ नमः आद्यायै।। श्रृणु वत्स प्रवक्ष्यामि आद्यास्तोत्रं महाफलम्।। यःपठेत्सततं भक्त्या स एव विष्णुवल्लभः।।१।। मृत्युव्याधिभयं तस्य नास्ति किंचित् कलौ युगे।। अपुत्रा लभते पुत्रं त्रिपक्षं श्रवणं यदि।।२।। द्वौ मासौ बन्धनान्मुक्तिर्विप्रवक्त्राच्छ्रुतंयदि।। मृतवत्सा जीववत्सा षण्मासं श्रवणं यदि।।३।। नौकायां सङ्कटे युद्धे पठनाज्जयमाप्नुयात्।। लिखित्वा स्थापनं गेहे नाग्निचौरभयं क्वचित्।।४।। राजस्थाने जपो नित्यं प्रसन्नाः सर्वदेवताः।। ओंह्रीम।। ब्रह्माणी ब्रह्मलोके च वैकुण्ठे सर्वमंगला।।५।। इंद्राणी त्वमरावत्यामम्बिका वरुणालये।। यमालये कालरूपा कुबेरभवने शुभा।।६।। महानंदाग्निकोणे च वायव्यां मृग-वाहिनी।। नैर्ऋत्यां रक्तदन्ता च ऐशान्यां शूलधारिणी।।७।। पाताले वैष्णवीरूपा सिंहले देवमोहिनी।। सुरसा च मणिद्वीपे लंकायां भद्र-कालिका।।८।। रामेश्वरी सेतुबन्धे विमला पुरुषोत्तमे।। विरजा औड्र-देशे च कामाख्या नीलपर्वते।।९।। कालिका वंगदेशे च अयोध्यायां महेश्वरी।। वाराणस्यामन्नपूर्णा गयाक्षेत्रे गयासुरी।।१०।। कुरूक्षेत्रे भद्र-काली व्रजेकात्यायनी परा।। द्वारकायां महामाया मथुरायां

महेश्वरी॥११॥ क्षुधा त्वं सर्वूभूतानां वेला त्वं सागरस्य च॥ नवमी कृष्णपक्षस्य शुक्लस्यैकादशी परा॥१२॥ दक्षस्य दुहिता देवी दक्षयज्ञविनाशिनी॥ रामस्य जानकी धात्री रावणध्वंसकारिणी॥१३॥ चण्डमुण्डवधे देवी रक्तबीजविनाशिनी॥ निशुम्भशुम्भमथिनी मधुकैटभघातिनी॥१४॥ विष्णुभक्तिप्रदा दुर्गा सुखदा मोक्षदा सदा॥ इममाद्यास्तवं पुण्यं यः पठेत् सततं नरः॥१५॥ सर्पज्वरभयं न स्यात्सर्वव्याधिविनाशनम्॥ कोटितीर्थफलं तस्य लभते नात्र संशयः॥१६॥ जया मे चाग्रतः पातु विजया पातु पृष्ठतः॥ नारायणी शीर्षदेशे सर्वांगे सिंहवाहिनी॥१७॥ शिवदूती उग्रदण्डे प्रत्यंगे परमेश्वरी॥ विशालाक्षी महामाया कौमारी शंखिनी शिवा॥१८॥ चक्रिणी जयदात्री च रणमत्ता रणप्रिया॥ दुर्गा जयन्ती काली च भद्रकाली महोदरी॥१९॥ नारासिंही च वाराही सिद्धिदात्री सुखप्रदा॥ जयंकरी महारौद्री महाभयविनाशिनी॥२०॥

सङ्कटास्तोत्रम्

ओं नमः सङ्कटायै॥ नारद उवाच॥ योगि सेव्य मुनिश्रेष्ठ सर्वज्ञ

सुखदायक।। आख्यानानि सुपुण्यानि श्रुतानि त्वत्प्रसादतः ।।१।। न तृप्तिमधिगच्छामि तव वागमृतेन च ।। वदस्वैकंमहाप्राज्ञ सङ्कटाख्यानमुत्तमम् ।।२।। इति तस्य वचः श्रुत्वा योगिसेव्योऽब्रवीद्वचः।। सङ्कष्टनाशनंस्तोत्रं श्रृणु देवर्षिसत्तम ।।३।। द्वापरे तु पुरावृत्ते भ्रष्टराज्यो युधिष्ठिरः।। भ्रातृभिःसहितोऽरण्यं निर्वेदं परमं ययौ।।४।। तदानीं तु ततः काशीपुराद्यातो महामुनिः।। मार्कण्डेय इति ख्यातो महाशिष्यो महातपाः ।।५।। तं दृष्ट्वा तु समुत्थाय प्रणिपत्यसुपूजितः।। किमर्थं म्लानवदनएतत्त्वंमां निवेदय।।६।। युधि-ष्ठिर उवाचा संकटं मे महत्प्राप्तमेतादृक्वदनंततः ।। एतन्निवारणोपायं किञ्चिद्ब्रूहि महामते ।।७।। मार्कण्डेय उवाच ।। आनन्दकानने देवी संकटा नाम विश्रुता।। वीरेश्वरोत्तरे भागे चन्द्रेशस्य च पूर्वतः ।।८।। श्रृणु नामाष्टकं तस्याः सर्वसिद्धिप्रदं नृणाम्।। संकटाप्रथमं नाम द्वितीयं विजया तथा।।९।। तृतीयं कामदा प्रोक्तं चतुर्थं दुःख हारिणी।। शर्वाणी पञ्चमं नाम षष्ठं कात्यायनी तथा ।।१०।। सप्तमं भीमनयनासर्वरोगह-राष्टकम्।। नामाष्टकमिदं पुण्यं त्रिसन्ध्यं श्रद्धयान्वित :।।११।। यःपठेत् पाठयेद्वापि नरो मुच्येत संकटात्।। इत्युक्त्वा तदृषिश्रेष्ठःस तु वारा-णसीं ययौ।।१२।। ततःसंपूज्यतांदेवीवीरेश्वरसमन्विताम्। भुजश्च दश-

भिर्युक्तांलोचनत्रितयान्विताम्।।१३।। मालाकमण्डलूपेतां वरपद्मग-दाधराम्।। त्रिशूलडमरूचापखङ्गचर्मविभूषिताम्।।१४।। इति तस्य वचः श्रुत्वा नारदो हर्षितोऽभवत्।। ततश्चाभयहस्तां तां प्रणम्यविधि-नन्दनः।।१५।। वरत्रयं गृहीत्वा तु ततो विष्णु पुरं ययौ। एतत्स्तोत्रस्य पठनं पुत्रपौत्रादिवर्द्धनम्।।१६।।संकष्टनाशनं चैव त्रिषु लोकेषु विश्रु-तम्।। गोपनीयं प्रयत्नेन महावन्ध्याप्रसूतिकृत्।।१७।। इति श्रीपद्मपु-राणे संकटानामाष्टकस्तोत्रं समाप्तम्।।

ओंतत्सदित्यादिकं पठनीयम्

ओं नमश्चण्डिकायै।। ओंतत्सदित्युच्चार्य्य।। या देवी स्तूयते नित्यं विबुधैर्वेदपारगैः सा मे भवतु जिह्वाग्रे ब्रह्मरूपा सरस्वती।।१।। ओं ब्रह्मोवाच।। जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि।। जय सर्वगते देवि कालरात्रि नमोस्तुते।।२।। श्रीमत्सुरासुराराध्यामरूणाम्बुरुहस्त-नीम्। चराचरजगद्धात्रीमम्बिकां प्रणमाम्यहम्।।३।। जयन्तीमङ्गला-काली भद्रकाली कपालिनी। दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोस्तुते।।४।। मधुकैटभविध्वंसि विधातृवरदे नमः।। रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।५।। महिषासुरनिर्णाशि त्रैलोक्यवरदे

नमः।। रूपं० ।।६।। रक्तबीजवधे देवि चण्डमुण्डविनाशिनि।। रूपं०।।७।। शुम्भस्यैवं निशुम्भस्य तथा धूम्राक्षमर्दिनी।। रूपं० ।।८।। वन्दितांघ्रि-युगे देवैर्देवि सौभाग्यदायिनि।। रूपं०।।९।। अचिन्त्यरूपचरिते सर्व-शत्रुविनाशिनि।।रूपं०।।१०।। नतेभ्यः सर्वदा भक्त्या चण्डिके दुरि-तापहे।।रूपं०।।११।। स्तुवतां भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि।। रूपं०।।१२।। सुरथस्य समाधश्च दत्तमिष्टं वरं वरम्।। रूपं०।।१३।। चंडिके सततं ये त्वामर्च्चयन्तीह भक्तितः।। रूपं०।।१४।। देहि सौभा-ग्यमारोग्यं देहि देवि परं सुखम्।। रूपं०।।१५।। विधेहि देवि कल्याणं विधेहि विपुलां श्रियम्।। रूपं०।।१६।। चण्डिके सततं दुर्गे जयं दास्यसि सर्वदा।। रूपं०।।१७।। विधेहि द्विषतां नाशं विधेहि बलव-र्चसी।। रूपं०।।१८।। सुरासुरशिरोरत्ननिघृष्टचरणांबुजे।।रूपं०।।१९।। विद्यावन्त यशस्वंतं लक्ष्मीवन्तं जनं कुरू।। रूपं०।।२०।। देवि प्रच-ण्डदोर्दण्डदैत्यदर्पनिषूदिनि।।रूपं० ।।२१।। प्रचण्डदैत्यदर्पघ्ने चंडिके प्रणतोऽस्मि ते।।रूपं० ।।२२।। चतुर्वक्त्रैश्चतुर्वक्त्र संस्तुते परमेश्वरि-।।रूपं० ।।२३।। कृष्णेन संस्तुते देवि शश्वद्भक्त्या त्वमम्बिके।।-रूपं०।।२४।। हिमाचलसुतानाथसंस्तुते परमेश्वरि ।।रूपं दे० ।।२५।।

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि।।रूपं देहि०।।२६।। देवि भक्त-जनोद्दामदत्तानन्दोदयेऽम्बिके।। रूपं०।।२७।। पत्नीं मनोरमां देवि मनोवृत्त्यनुसारिणीम्।। तारिणीं दुर्गसंसारसागरस्याचलोद्भवे।।२८।। इदंस्तोत्रंपठित्वा तु महास्तोत्रं पठेन्नरः।। सतु सप्तशतीसंख्यावरमाप्नोति सम्पदाम् ।।२९।। नान्यथा फलमप्नोति श्रीशिवस्यानुशासनात्।।३०।। इति ब्रह्माण्डपुराणे मार्कण्डेयब्रह्मसंवादे अर्गलास्तोत्रं समाप्तम्।। श्रीजगदंबार्पणमस्तु।।

कीलकस्तोत्रम्

ओंतत्सत्।। मार्कण्डेय उवाच।। विशुद्धज्ञानदेहाय त्रिवेदी दिव्यचक्षुषे।। श्रेयःप्राप्तिनिमित्ताय नमस्सोमार्धधारिणे।।१।। सर्वमेताद्विजानीयान्मन्त्राणामपि कीलकम्।। सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः।।२।। सिद्धयंत्युच्चाटनादीनि कर्माणिसकलान्यपि।। एतेन स्तुवतां देवीं स्तोत्रमात्रेण भक्तितः।।३।। न मन्त्रो नौषधं तस्य न किञ्चिदपि विद्यते।। विना जाप्येन सिध्येत सर्वमुच्चाटनादिकम्।।४।। समग्राण्यपि सिध्यन्ति लोकशंकामिमां हरः।। कृत्वा निमन्त्रयामास सर्वमेवमिदंशुभम्।।५।। स्तोत्रं वै चंडिकायास्तु तच्च गुह्यं चकार सः।। (सम्पूर्णं

फलमेतेन ततःप्रारभ्यते च तत्॥ ऐश्वर्य्यं तत्प्रसादेन सौभाग्यारोग्य-सम्पदः॥) सम्प्राप्नोति सुपुण्येन तां यथावन्नियंत्रणाम्॥६॥ सोपि क्षेममवाप्नोति सर्वमेव न संशयः॥ कृष्णायां वा चतुर्दश्यामष्टम्यां वासमाहितः॥७॥ ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति॥ इत्थं रूपेणकीलेन महादेवेन कीलितम्॥८॥ योनिष्कीलां विधायैनां चण्डीं-जपतिनित्यशः॥ ससिद्धःसगणः सोऽथ गन्धर्वो जायते ध्रुवम्॥९॥ न चैवाप्यशुभं तस्य भयं क्वापि न जायते॥ नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात्॥१०॥ ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणोविनश्यति॥ ततो ज्ञात्वैव सम्पूर्णमिदं प्रारभ्यते बुधैः॥११॥ सौभाग्यादि च यत्-किञ्चिद्दृश्यतेललनाजने॥ तत्सर्वं तत्प्रसादेन तेनजाप्यमिदं सदा-॥१२॥ शनैस्तु जाप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरूच्चकैः॥ भवत्यैव समग्रहि ततः प्रारभ्यमेव तत्॥१३॥ ऐश्वर्य यत्प्रसादेन सौभाग्यारो-ग्यसम्पदः शत्रुहानिःपरोमोक्षःस्तूयते सा न किं जनैः॥१४॥ चंडिकां त्हृदयेनापियःस्मरेत् सततं नरः॥ हृदिद्यं काममवाप्नोतिह्न देवी वसेत् सदा॥१५॥ अग्रे वेदं महादेव्या कृत्वाकीलकधारणम्॥ निष्कलिकं तथा कृत्वा पठितव्यं समाहितैः॥१६॥ सर्वेषां चैव देवानां विद्यानां च

यशस्विनाम्।। इदं योनिः समाख्याता सर्वमन्त्रेषु गोपिता।।१७।। इति श्रीब्रह्माण्डपुराणे मार्कण्डेयब्रह्मसंवादे कीलकस्तवःसमाप्तः।

नवग्रहस्तोत्रं पुनःपठनीयम्

भगवत्याःप्रणामः

सर्वमङ्गलमांगल्ये शिवे सर्वार्थसाधिके।। शरण्डये त्र्यम्बके गौरी नारायणि नमोस्तु ते ।।१।।

सरस्वत्या ध्यानम्

तरूणसकलमिन्दुं ब्रिभ्रती शुभ्रकांतिः कुचभरनमितांगी सन्निषण्णा सिताब्जे।। निजकरकमलोद्यल्लेखनीपुस्तकश्रीः सकलविभवसिद्धयै पातु वाग्देवता नः।।१।।

सरस्वत्याः प्रणामः

भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः।। वेदवेदान्तवेदांगविद्या-स्थानेभ्य एव च।।१।।

गरुडस्तोत्रम्

सुपर्णंवैनतेयं च नागारिं नागनाशनम्।। विषान्तकं जितविषमजितं विश्वरूपिणम्।।१।। गरूत्मन्तं खगपतिं ताक्ष्यं कश्यपनन्दनम्।। द्वादशैतानिनामानि गरूडस्य महात्मनः।।२।। यःपठेत्प्रातरुत्थाय स्त्रोतो वा शयनेऽपिवा।। विषं न भ्रमते तस्य न तं हिंसंति पन्नगाः।।४।। संग्रामे विजयस्तस्यबन्धनेमुक्तिमाप्नुयात्।। यात्रायां लभतेसिद्धिंतस्मान्नित्यंपठेन्नरः।।४।। इ० गरुडपुराणेगरु डस्तोत्रंस०।

मनसाया ध्यानम्

आस्तीकस्य मुनेर्मात्रे भगिन्यै वासुकेस्तथा।।
जरत्कारूमुनेः पत्न्यै मनसायै नमोस्तु ते ।।१।।

लक्ष्मीध्यानम्

पाशाक्षमालिकाम्भोजसृणिभिर्याम्यसौम्ययोः।।पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम्।।१।। गौरवर्णां सुरूपां च सर्वालंकारभूषिताम्।। रौक्मपद्मव्यग्रकरांवरदांदक्षिणेनतु।।२।।

लक्ष्मीप्रार्थना

नमस्ते सर्वभूतानां वरदासि हरिप्रिये।। या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्।।१।। धनदायै नमस्तुभ्यं नित्यं पद्मालये रमे।। भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः।।२।।

गुरूप्रणामः

अखण्डमलाकारं व्याप्तं येन चराचरम्।। तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः।।१।।

विष्णुचरणामृतधारणमन्त्रः

अकालमृत्युहरणं सर्वव्याधिविनाशनम्।। विष्णुपादोदकं पीत्वा शिरसा धारयाम्यहम्।।१।।

विप्रपादोदकधारणे मन्त्रः

विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी।।
तावत् पुष्करपात्रेण पिबन्ति पितरो जलम्।।१।।

इति नित्यकर्मपद्धतिः सम्पूर्णा।